कार्यकारोपाह्व डा० स्वामिनाथविरचितम्

श्रीबदरीशसुप्रभातम्

ŚRĪ BADARĪŚA SUPRABHĀTAM

BY

Dr. C. R. Swaminathan
alias "KARIAKAR"

WITH
An English Forward by
Sri N. Raghunatha Iyer

Published by Author
1980

कार्यकारोपाह्व डा० स्वामिनाथविरचितम्

श्रीबदरीशसुप्रभातम्

ŚRĪ BADARĪŚA SUPRABHĀTAM

BY

Dr. C. R. Swaminathan
alias "KARIAKAR"

WITH
An English Forward by
Sri N. Raghunatha Iyer



Published by Author
1980

All Rights with the Author

Price : Rs. 3.

Copies can be obtained from the author
DR. C. R. SWAMINATHAN
5/30 W. E. A. Karolbagh New Delhi-5.

Printers :
JAYANTI PRINTERS, Jayanagar, Mysore-14.

॥ श्रीः ॥

श्रीमत्परमहंसपरिव्राजकाचार्य

जगद्गुरु श्रीशङ्करभगवत्पादाचार्य परम्परागतं श्रीकामकोटि पीठ महासंस्थानम्

काञ्चीपुरम्

यात्रास्थानम् – पुष्करक्षेत्रम्

३१-५-१९८०

योगेश्वरस्य भगवतो बदरीनारायणस्य, तदावासभूत-उत्तुङ्गहिम-शैले विराजमानबदरिकाश्रमस्य च महिमा 'श्रीबदरीशसुप्रभात'नामककाव्ये कार्यकार स्वामिनाथशर्मणा सम्यगुपवर्णितं समग्रम् अस्माभिः परिशीलितम् ॥

तत्र न केवलं बदरिकाश्रमवर्णनं, किन्तु भारतभागवतादिग्रन्थेषु विद्यमानाः बदरिकाश्रमसंबद्धविषयाश्च सर्वेषां अवगमनाय तत्र तत्र उद्धृतास्सन्ति। विशिष्य भगवत्पादाद्याचार्याणां चिरंजीविनां भागवतादीनां च स्मरणम् अस्य पठनेन संजायते। प्रातःकाले एतादृशमहापुरुषाणां भक्तानां स्मरणेन स्तवनेन च त्रिकरणशुद्धिः समुद्भजायते। एतद्द्वारा तेषामनुग्रहोऽपि लभ्यते ॥

अतः काव्यरचने प्रेरितवतः सि. एस्. रामचन्द्रशर्मणः, काव्यरचयितुः सि. आर्. स्वामिनाथशर्मणः, पठितॄणां च अनन्तस्वरूपस्य श्रीबदरिकेश्वरस्य कृपया सर्वेश्रेयःप्रेयःपरम्परावाप्तिः भूयादित्याशास्महे ॥

रौद्री अधिकज्येष्ठ-पौर्णमी
पुष्करक्षेत्रम्

नारायणस्मृतिः

FORWARD

It is an endearing feature of our Hindu modes of worship that we offer to the Deity the same honours as we show to the King. It seems to bring God so much nearer to us. The awakening of the Lord in the early hours of the morning is done to the singing of hymns of praise with the refrain *'Tava Suprabhatam'*. Those words, meaning, 'may be day dawn auspiciously for Thee' usually wind up a verse which is in reality a glorification of a particular victory of the Lord; in one incarnation or other, over the forces of evil. For a secular parallel see Sumantra's praise of Dasaratha on the morning which was to see Rama's going into exile. All unconscious of what was impending, Sumantra said:

इन्द्रमस्यां तु वेलायामभितुष्टाव मातलिः।
सोऽजयद्दानवान् सर्वांस्तथा त्वां बोधयाम्यहम्॥

The most favous of these 'Suprabhatam' compositions is the Sri Venkateswara Suprabhatam which thanks to its literary beauty, and its rendering for the gramophone Companies by distinguished musicians is heard in practically in every household in the mornings.

Quite a number of other Suprabhatams, though not so popular, have of recent years been composed

or publicised by devotees in praise of their favourite deity, usually one of the six who figure in the Panchayatana Poojah. Dr. C. R. Swaminathan, an eminent scholar and student of philosophy, with a gift for poetry, has struck out a new path for himself in singing in fifty verses the praises of the divine twins Nara and Narayana, who incarnated as the sons of Dharma, born of Murthi, Daksha's daughter, who, almost as soon as they were born, went to Badarikashram in the inner Himalayas to practise eternal *tapas* for the welfare and enlightenment of mankind. This was a rather unique incarnation since it was in no way concerned with action (Karma). *Naishkarmyasiddhi* is the gateway to liberation according to the Advaitin. It is the perpetual inspiration accorded by their presence, example and teaching that has always drawn hundreds of highly evolved souls to Badari. Dr. Swaminathan pays fitting tribute to the preceptors of Advaita from Brahma and Vasishta down to H. H. Sri Chandrasekharendra Saraswati Poojyapada, as faithful to the tradition of Nara Narayana. The Lord, when he was about to return to Vaikuntha, told his favourite disciple Uddava to go and spend the rest of his life in tapas there. From this it should be obvious that the path of devotion was not excluded from the Badari discipline.

It is therefore no wonder that, while many other Puranas pay reverence to the Nara–Narayana incarnation, it is the Srimad-Bhagavatam that brings out its full glory. And Dr. Swaminathan has in weaving his garland of verses made the fullest use of the references

in it to this *avatara.* Of incidents, there are only two the story of how Indra, alarmed for his primacy, which he thought might be jeopardised by their austerities, sent the most beautiful *Apsarases* of his Court, accompained by every other celestical tamptation, to distract their minds. But Narayana., with a laugh, showed Indra's minions, the women in attendance on him in his ashram. And they so surpassed Indra's attendants in beauty and excellence of every kind that they sank into themselves for very shame. And the rishi heaped coals of fire on their head by inviting them to take with them as a present to their master one of those women whom they regarded as outstanding. They took Urvasi with them and told Indra of what had happend, and Indra was overawed. The one other incident of which, Dr. Swaminathan rather inexplicably makes no use is described in the Twelth Skanda where Narayana brings about an *avantara-pralaya* to demonstrate to Markandeya the nature of the Lord's Maya. But Dr. Swaminathan brings out in nine verses (39–47) the essence of that Maya and the paradox at the heart of this incarnation the identity in difference of Nara and Narayana, the eternal inseparable twins. The Bhagavata (Sk. XI, Ch. 4) says, He, the first of sages ever established in peace taught by example and precept the way of self–Realisation which is characterised by the cessation of all activities, and remains practising it to this day, while the foremost of sages serve at his feet. (XI IV 6). In verses 39 to 46 Dr. Swaminathan brings out with clarity and beauty the unique features of this *avatar.*

अन्यावतारसमये विविधक्रियाभि-
धर्मस्थितिर्विरचिता किमु तत्र चित्रम्।
निष्कर्मणैव जगतीमिह पासि विष्णो
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ ४१ ॥

Kalidasa described Vishnu as 'स्वप्नेपतो जागरूकस्य'. In the same spirit, Dr. Swaminathan, while identifying all the incarnations as essentially one, (Nara-Narayana incarnated later as Krishna and Arjuna) not only devotes 8 verses to the well-known Dasavataras. He recalls the Chiranjivis and the great devotees of all time who sit at the feet of Narayana. He relevently brings in other episodes in the Bhagavata, such as the Hamsa Gita. He emphasises the special significance of this *avatara* for the Advaitin, and refers to the great part played by Sri Sankara Bhagavatpada in establishing the modes of worship in the temple. That the Lord was pleased to create the tapta kunda (hot spring) out of compassion for his southern worshippers is, even if it may be apocryphal, heart-warming Infinite is the Lord's mercy, and Swaminathan's poem which commends itself by its simple and flowing style is to be welcomed as another garland from the South laid reverently at the feet of the Lord.

5th July, 1980. **N. Raghunatha Iyer**

INTRODUCTION

Worshiping one's Iṣṭadevatā with all royal honours and formalities or Upacārās, is an age-old practice. Conventionally, such Upacārās start with waking-up the Lord in the early morning. When the sanctum is opened, the devotees, eagerly waiting outside to get a glimpse of the Lord's Arcā-Vigraha, sing his glory in Bhūpāla tune and invoke his benign Kaṭākṣa or side glances for the benefit of humanity. This sets the pattern for the rapport between the devine and the mundane throughout the rest of the day.

The Venkateswara Suprabhatam, sung in praise of the Lord of the Seven Hills at Tirupati is very popular; thanks to Smt. M. S. Subbulakshmi, who has set it to music in her inimitable voice and transerred it to L. P. records. A similar Stotra in praise of the Lord at Badrinath is attempted in this small booklet. Shri C. S. Ramachandran, ICS (Retired) who has been, after his glorious civil service, nominated as Honorary Chairman of the Badrinath Trust, prompted me in this attempt. I do not, for a moment feel complacent over what I have written. There are much more qualified and talented persons who could have done better justice. Whether this attempt has succeeded, is to be judged by the scholars. If the very imperfection of this work prompts some worthy hands to undertake a more scholarly composition, that itself will be deemed as a fulfilment of my objective.

The early morning time is auspicious for Hindus to entertain devotional thoughts. This is the moment to contemplate on God and to remember great souls and sages as well as auspicious Tirthas. Such houghts purify our mind and impart certain purity to us throughout the day. Pure thoughts lead naturally to pure words and actions. In other wods, such pious thoughts in the early morning hours stand in good stead even in our worldly activities. While human effort should be to attain perfection in thought, word and deed, there are several factors in the day to day life which try to distract us from the ideal. The auspicious thoughts, relating to God and to the great souls who enjoyed his grace, coming to us through such stotras, off-set the above mentioned distractions and enable us to some closer to the ideals.

This particular stotra contains certain references to the shrine of Badrinath found in the Mahābhārata and Bhāgavata. It is at this holy spot that the Lord by precept, upholds the glory of Tapas. It is here that Nārāyaṇa imparted spiritual instructions to Sanat-kumāra and others. The holy river Ganges assumed its role as Purifier by washing the feet of the Lord at this place. The great Mahābhārata epic has its genesis from Vyāsa from this holy spot. In short, our country owes to Badrinath, to a very great extent, its claim to be called the Puṇya-Bhūmi. In this Stotra there are references to Chiranjivins; to certain pious souls who lived short but glorious lives and to certain devotees who under-went severe privations in spite of their

life of devotion. The deathless existence of the Chiranjivins was not a burden for them or for the society since it was throughout engaged in the service of the Lord. The short life span of the great souls was every moment of it purposeful and worthy of emulation even to this day. The sufferings and privations of a devotee like Prahlāda were pleasurable experiences both for him and others like us and have inspired generations of poets to sing their glory. Each one of us, on the basis of mere longivity of life or of the pleasure and pain of it, belongs to one or the other of these categories. We can make it akin to that of Hanumān or Alarka or Bhiṣhma. We can atleast cease to worry about how long we would live and think of how best we would live. The former type of worry is obviously a sheer waste of energy and time since it is about the inevitable. The later involves a planning about the possible and helps one to get the full worth of life, however short it might be and however painful it might be. The first is the symptom of ignorance and the second is planning for the future and posterity. This planning for the rest of our life-time consists of the daily planning in the early morning hours, with the help of such Suprabhata Stotram to sub-serve the cause of devotion.

When I was finishing writing this stotra, Shri Varadacharyar of Mysore happened to come to Delhi and volunteered to get it printed in his Press. Simultaneously अघटितघटनापटीयसी भगवदिच्छा (Divine-will which makes possible even the impossible) prompted my friend Sri Arjuna Raja (Southern Asbests Cement

Ltd) to donate the paper free of cost for printing the same. I must thank the donor and also express my gratitude to Shri Vardacharyar who not only printed it in a short time but also offered some good editorial suggestions.

My respectful Pranams are due to HIS HOLINESS Jagadguru Shri Shankaracharya of Kanchi Kamakoti Peetha for having blessed me with a Srimukha for this work. I cannot adequately express my indebtedness to Shri N. Raghunatha Iyer, who in spite of his ripe old age and other intellectual pre-occupations, agreed to write a nice forward for this work. Lastly I must express my gratitude to Shri C. S Ramachandran for prompting me to write this and to Shri R. K. Sharma, Education Officer (Sanskrit) Ministry of Education, my colleague, for giving some valuable editorial suggestions.

Dr. C. R. Swaminathan

॥ श्रीः ॥

श्रीगणेशाय नमः
श्रीनरनारायणाभ्यां नमः
श्रीगुरुभ्यो नमः

कार्यकारोपाह्व डा० स्वामिनाथविरचितम्

श्री ब द री श सु प्र भा त म्

[1] लम्बोदरो निजरदं सहसा विपाट्य
व्यासोक्तभारतकथां लिखितुं प्रवृत्तः ।
विघ्नानपोह्य, भगवन् बदरीगुहास्थ ![2]
विघ्नेश ! मे दिश शुभं, तव सुप्रभातम् ॥ १ ॥

[3] पद्मोद्भवप्रमुखशक्तिवसिष्ठमुख्यैः
श्रीशङ्कराख्ययतिना च तदीयशिष्यैः ।
[4] आचन्द्रशेखरयतीन्द्रमुपास्यमान
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ २ ॥

---

[1] विघ्नविनाशनाय श्रीगणेशः प्रार्थ्यते । लकारः गणपतेः बीजाक्षरम् ॥

[2] 'गणेशगुहा' इति बदरीशमन्दिरस्य नातिदूरे काचन गुहा वर्तते ॥

[3] 'नारायणं पद्मभुवं वसिष्ठं शक्तिं च तत्पुत्रपराशरं च' इत्यादिश्लोकोक्ता गुरुपरम्परा ग्रन्थादौ स्मर्यते ॥

[4] श्रीकाञ्चीकामकोटिपीठाधीश्वराः श्रीचन्द्रशेखरेन्द्रसरस्वतीश्रीचरणाः भगवत्पादादारभ्य ६८ तमा आचार्याः ॥

पक्षीन्द्रवाहन पराशरपुत्रवन्द्य
पूर्णावतार पुरुषोत्तम पार्थबन्धो !
पद्मायताक्ष पवनात्मजसेविताङ्घ्रे
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ ३ ॥

नारायणाखिलगुरो नरकान्तकारिन्
नागेन्द्रतल्प नरनारदगीतकीर्ते !
नाभीसरोजभवसंस्तुत कैटभारे !
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ ४ ॥

उर्वीपते उरुपराक्रम कर्मसाक्षिन्
[1]ऊरूद्भवाद्युतिजितामरनारिगर्व !
उत्तुङ्गशृङ्गतुहिनाचलनित्यवासिन्
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ ५ ॥

प्रह्लादमुख्यनिजभक्तजनाभिवन्द्य
प्रस्थानभेदशतगम्य परात्परेश !
पापौघकाननदवानल पद्मनाभ
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ ६ ॥

भागीरथीतटविहार भवाब्धिपोत
भाग्यस्वरूप भुवनस्य भयापहारिन् !
भीमाभिवन्द्य भगवन् भुजगेन्द्रशायिन्
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ ७ ॥

---

[1] श्रीनारायणस्य तपोभङ्गाय देवेन्द्रप्रेषिताः रम्भादयः भगवदूरूद्भवामूर्वशीं दृष्ट्वा लज्जावनताः समभूवन्निति पौराणिकी कथा ॥

[1]श्रीशङ्कराख्ययतिराजकृतां व्यवस्थां
स्वाराधनाय महितामनुमन्यमानः।
शिष्टावनैकनिरतः श्रितपारिजातः
श्रीनाथ ते बदरिकेश्वर! सुप्रभातम्॥८॥

[2]नम्पूतिरीरचितया वरिवस्यया यः
प्रीतो भवन्ननुदिनं नवतामुपैति।
[3]नाभागजाभयद हे प्रणतार्तिहारिन्
श्रीनाथ ते बदरिकेश्वर! सुप्रभातम्॥९॥

तत्त्वंपदार्थ तरणे भवसागरस्य
तापत्रयोद्धरणदक्ष तमालकान्ते!
तर्कैरगम्य तरुणाम्बुदकोमलाङ्ग
श्रीनाथ ते बदरिकेश्वर! सुप्रभातम्॥१०॥

नारयणीप्रिय नताभय दीनबन्धो
नामावशेषितहिरण्य नृसिंहरूप!
नामावलीजपनतुष्ट नरावतार
श्रीनाथ ते बदरिकेश्वर! सुप्रभातम्॥११॥

---

[1] आदिशङ्करभगवत्पादैः वरिवस्याक्रमो निर्धारित इति शङ्करविजयग्रन्थेषु वर्तते॥

[2] केरलीयनम्पूतिरीद्विजा एव बदर्यां रावल् इति नाम्ना पूजां कुर्वन्ति॥

[3] नाभागजः—अम्बरीषः॥

[1] भक्तोत्तमोद्धवसमुद्धरणे प्रवृत्ता
ज्ञानामृतामरधुनी शुकसेव्यमाना ।
[2] नन्देव नन्दयति या भणितिस्त्वदीया
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ १२ ॥

व्यासप्रणीतनवनाटकसूत्रधार
वेदान्तवेद्य वरदाभयहस्त विष्णो !
[3] विश्वंपदाख्य विजयप्रिय विश्वमूर्ते
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ १३ ॥

[4] यो दाक्षिणात्ययतिपुङ्गवपार्षदानां
शीताम्भसि स्नपनखेदमपाकरिष्णुः ।
तप्तोदकोद्गमनमारचयद्धिमाद्रौ
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ १४ ॥

[5] द्रौण्याङ्गनेयकृपनारदजाम्बवद्भि-
राराधितः प्रतिदिनं जितमृत्युपाशैः ।
यक्षेशदिश्यधिवसन् तपसे विशालां [6]
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ १५ ॥

---

[1] उद्धवाय बदर्याश्रमे नारायणेन ज्ञानोपदेशः कृत इति भागवतस्य ११स्कन्धगता कथा स्मर्यते ।

[2] नन्देव – अलकनन्दाप्रवाह इव ज्ञानोपदेशप्रवाह इत्यर्थः ॥

[3] विष्णुसहस्रनामस्तोत्रे प्रथमं विश्वमिति भगवन्नाम ॥

[4] शङ्करभगवत्पादाः यदा शिष्यैस्सह बदरिकाश्रमं जग्मुः, तदानीं शीताधिक्येन स्नातुमक्षमाणां कृते भगवत्पादप्रार्थनया तप्तकुण्डाः प्रादुरभूवन्निति कथाऽत्र स्मर्यते ॥

[5] प्रातस्स्मरणीयाश्चिरंजीविनोऽत्र स्मर्यन्ते ॥

[6] 'विशाला' इति बदरिकाश्रमस्य नामान्तरम् ॥

[1] त्वद्भक्तनिस्सृतविवेकसुरापगायां
त्वत्पादनिर्गतभगीरथभाग्यधुन्याम् ।
यातु प्रयागमिलनं तव नेत्रकान्तिः
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ १६ ॥

रम्भादिदेववनिताहृदयानुरागं
गङ्गाजलानि चलवीचिरवैस्त्वदीये ।
कर्णे वदन्त्यतिभयादिव चोर्वशीतः
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ १७ ॥

भागीरथी निजजलैस्तव पादयुग्मे
पाद्यं समर्पयितुमेति दिवं विहाय ।
शीघ्रं स्वकृत्यमतिवाह्य यियासुरेषा
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ १८ ॥

[2] मत्स्याकृते श्रुतिसमुद्धरणैकदक्ष
मज्जन्महीध्रधरणे कमठावतार !
भूदार भूरिकृप यज्ञवराहमूर्ते
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ १९ ॥

कायाधवप्रिय हरे नरसिंहवेष
याच्ञाच्छलेन बलिदानवदर्पहारिन् !
मायावटो जितजगत्त्रय विश्वरूप
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ २० ॥

---

[1] भगवद्गीता ॥

[2] अष्टभिः श्लोकैः दशावताराः वर्ण्यन्ते ॥

ब्रह्मण्य भार्गव विनाशितभूपवर्ग
भूदानतर्पितमहीसुर जामदग्न्य !
विप्रावतार परशुक्षतकार्तवीर्य
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ २१ ॥

सीतापते दशरथात्मज सत्यसन्ध
सौमित्रिदाशपति[1] वन्द्य दशास्यशत्रो !
वातात्मजाश्रित विभीषणसेविताङ्घ्रे
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ २२ ॥

संकर्षणाख्य भगवन् धृतनीलवस्त्र
[2]हालानुरक्त हलकृष्टकलिन्दकन्य ![3]
योऽरेवतीप्रियतमो मुसली मुकुन्दः
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ २३ ॥

श्रीकृष्ण वृष्णिसुत कंसरिपो मुकुन्द
गोवर्धनोद्धरण रासविलोल शौरे !
पार्थप्रिय श्रितजनावन भीष्मवन्द्य
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ २४ ॥

---

[1] दाशपतिः – गुहः ॥

[2] बलरामामिमतो मदिराविशेषः ॥

[3] भागवते दशमस्कन्धे अध्यायः 65. श्लोकाः 23–33.

दोग्धाऽसि वेदशिखराभिधकामदोग्ध्र्याः[1]
यस्माज्जगद्गुरुरिति प्रथितो जगत्याम् ।
वेद्यं च वेदकमसि प्रणवः पवित्रं[2]
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ २५ ॥

बुद्धावतार दयया जितसर्वलोक !
काले कलेस्तुरगवाहन कल्किरूपिन् !
खड्गप्रहारनिहताखिलदुष्टसङ्घ
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ २६ ॥

श्रीनारदः परमभागवतोऽत्र भूमन्![3]
सावर्णये परमहंसतनुं भवन्तम् ।
निर्वर्णयत्यनुदिनं नरदेवयुग्मं
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ २७ ॥

देवर्षयोऽपि यमसक्तविविक्तसाक्षी-[4]
त्याद्यं पूमांसमनघं मुनिमप्रमेयम् ।
संकीर्तयन्त्यनुदिनं प्रतिबोधरूपं
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ २८ ॥

---

[1] 'सर्वोपनिषदो गावः दोग्धा गोपालनन्दनः' इत्यादिश्लोकः स्मर्यतेऽत्र ॥
[2] 'वेद्यं पवित्रमोङ्कारः ऋक्सामयजुरेव च' इति भगवद्गीतायाम् ॥
[3] भागवते पञ्चमस्कन्धे अध्यायः 19, गद्यं 10.
[4] ,, ,, ,, श्लोकः 12.

[1]भृग्वङ्गिराश्च पुलहश्च मरीचिमुख्याः
त्वां तोषयन्ति, पुरुषोत्तम ! सामगानैः ।
गङ्गातरङ्गरवतालल्यप्रयुक्तैः
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ २९ ॥

[2]सौगन्धिकाकुसुमगन्धयुतोऽनिलोऽयं
वक्षस्थमाल्यमभिचालयति त्वदीयम् ।
मन्दाकिनीजलकणाः प्रतिबोधयन्ति
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ ३० ॥

पुष्पाणि विन्दुसरसः[3] पवनावधूता-
न्याश्लेषयन्ति भवतः कमनीयगात्रम् ।
कामातुरा व्रजतरुण्य इवाम्बुजाक्ष
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ ३१ ॥

शीतस्तुषारकणिकावलिरंस देशे
मुक्तामयीं रचयतीव तवाङ्गदाभाम् ।
शब्दापयन्ति पतगास्तव दर्शनोत्काः
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ ३२ ॥

---

[1] महाभारते वनपर्वणि अध्यायः. 112. श्लोक.. 6.
[2] ,, ,, ,, 146. ,, 3.
[3] ,, ,, ,, 145. ,, 44.

सृष्टोर्वशी सुरवधूगणगर्वशान्त्यै
चेतो हरेत्तव किलेति विचिन्त्य लक्ष्मीः ।
ईर्ष्यारुणेव तरुणार्कमरीचिकान्त्या
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ ३३ ॥

आघ्राय पादरजसं तव पद्मनाभ !
लोकान् पुनातुमतिवेगमुपागतेयम् ।
[1]नन्दा स्वफेनपटलायितमन्दहासा
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ ३४ ॥

रम्भादिदेववनिताभ्य उपात्तशङ्का
त्वच्चित्तमात्मधनमित्यवबोधयन्ती ।
लक्ष्मी सदा वसति वक्षसि तावकीने
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ ३५ ॥

[2]प्रह्लादनारदकुचेलकरीन्द्रकुब्जा-
भीष्माम्बरीषपवनात्मजपाण्डुपुत्राः ।
औत्तानपादशबरीगुहगोपकन्याः
प्राचेतसश्च भरतश्च [3]विभीषणश्च ॥ ३६ ॥

---

[1] नन्दा – अलकनन्दा ॥

[2] त्रिभिः श्लोकैः भागवतोत्तमाः स्मर्यन्ते ॥

[3] भरतः – राजा भरतः (जडभरतः) ॥

द्रौपद्यलर्कशुकगौतमधर्मदाराः[1]
ताक्ष्यार्किजौ विदुरशौनकधर्मदासाः ।
रुक्माङ्गदश्च भरतो[2] जनमेजयश्च
व्यासोऽभिमन्युतनयोऽथ पृथा जटायुः ॥ ३७ ॥

त्वत्पादपद्मधुपाः खलु साक्षिणस्ते
भक्तावनैकपरतां प्रति दीनबन्धो !
त्वत्तो न मेऽस्ति भवसागरतारकोऽन्यः
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ ३८ ॥

योगी निमील्य नयने हिमशैलशृङ्गे
निस्सङ्ग एष तप आचरतीह मौनी ।
चित्रं तथाऽपि भुवनावनजागरूकः
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ ३९ ॥

नारायणस्त्वमखिलं च नरादभिन्नः
भेदो नराद्भमज इत्यवबोधयिष्णुः ।
युग्माकृतिर्युगपदेकवपुर्विभासि
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ ४० ॥

अन्यावतारसमये विविधक्रियाभिः
धर्मस्थितिर्विरचिता किमु तत्र चित्रं ।
निष्कर्मणैव जगतामिह पासि विष्णो
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ ४१ ॥

---

[1] अहल्या. [2] भरतः – दाशरथिः.

योगेश्वरोऽस्यखिललोकगुरुस्वरूप-
स्त्वन्तर्मुखस्त्रिभुवनस्य च साक्षिभूतः ।
सृष्ट्यादिकं प्रकृतिकृत्यमवेक्षमाणः
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ ४२ ॥

नास्त्येव किञ्चिदपि मय्यतिरिक्तमत्र
सोऽहं च हंसवपुरस्मि नरोऽपि सोऽहम् ।
इत्थं प्रबोधयसि यस्सनकादिशिष्यान्
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ ४३ ॥

ईक्षा प्रकृत्यभिमुखी भवहेतुभूता
विश्वस्थितिं प्रकुरुते तव योगचर्या ।
संहारकृत्यमपि नेत्रनिमीलनात्ते
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ ४४ ॥

उन्मीलयाशु भगवन्नयनाब्जकोशं
आह्लादयन्तु भुवनं करुणाकटाक्षाः ।
लोकाश्च रोगभयरागविवर्जितास्स्युः
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ ४५ ॥

मोहान्धकारनिबिडे मम हृद्गुहान्तः
कारुण्यदीप्तिमभिवर्षतु ते कटाक्षः ।
यद्वर्चसा च निजरूपमभिस्फुरेन्मे
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥ ४६ ॥

व्यामोहहैमपवनेन विशुष्कमेतत्
मच्चित्तपद्ममुकुलं विकसेत्पुनश्च ।
त्वन्नेत्रमित्रकिरणैस्त्वरितं मुरारे
श्रीनाथ ते बदरिकेश्वर ! सुप्रभातम् ॥४७॥

श्रीगौडपादयतिराजमथास्य शिष्यं
गोविन्दपादमथ शङ्करदेशिकेन्द्रम् ।
तच्छिष्यकोटिमभिवन्द्य कृतिः कृतेयं
तुष्टयै सतां च बदरीश्वरसुप्रभातम् ॥४८॥

श्रीकामकोटिवरपीठमधिष्ठितो यः
श्रीचन्द्रशेखरयतिः करुणाम्बुराशिः ।
तस्याशिषा विरचितं खलु रामचन्द्र-
संचोदितेन बदरीश्वरसुप्रभातम् ॥४९॥

श्रीस्वामिनाथरचितं तव सुप्रभातं
स्तोत्रं त्विदं श्रवणकीर्तनलेखनाद्यैः ।
तुष्टयै भवेद्भुवनमङ्गलदायकस्य
नारायणस्य सनरस्य रसार्णवस्य ॥५०॥